National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(63): 22-25
© 2025 NJHSR
www.sanskritarticle.com

**सौरभ राउतः**
शोधच्छात्रः, व्याकरणविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**सौरभ राउतः**
शोधच्छात्रः, व्याकरणविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# शाब्दिकदृष्ट्या जगद्व्यवहारे शब्दब्रह्म

**सौरभ राउतः**

**शोधसारः**

व्याकरणं प्रकृतिप्रत्ययतत्तदर्थविभागसंस्कारद्वारा शब्दब्रह्म साक्षात्कारयति। आमुष्मिकानन्दास्यर्थं ब्रह्मणः साक्षात्कारार्थं च व्याकरणमध्येयम्। साधुशब्दाः यथार्थबोधशक्तिमादधति तथैव असाधुशब्दा अपीति वैयाकरणसमयः, असाधुशब्दाः यदि अर्थावबोधं कारयन्ति तर्हि व्याकरणाध्ययनेन किम्? इति चेत् भगवता भाष्यकारेणोच्यते- **समानायामर्थावगतौ शब्देन चापशब्देन च शास्त्रेण धर्मनियम** इति। अर्थात् शास्त्रेण धर्मनियमः क्रियते- साधुशब्देनैवार्थोऽभिधेयो नापशब्देनेति एवं क्रियमाणमभ्युदयकारि भवतीति।किञ्च **लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियम** इत्यप्याकरकारेण अभिधाय साधशब्देनैवार्थज्ञाने पुण्यं भवति,न त्वसाधुशब्देनेति। तस्यैव शब्दस्य स्वरूपं कथयन् भाष्यकारः **“येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां संप्रत्ययो भवति स शब्दः”**[1] अर्थात् येन प्रकाशितेन स्फोटेन सास्नादिमतां ज्ञानं भवति सः स्फोटः शब्द इति। अत्र भाष्ये स्फोटस्यानुल्लेखेऽपि उत्तरभाष्यमत्र स्फोटस्वीकारे मानं यथा **“प्रतीतपदार्थको लोके ध्वनिः शाब्द इत्युच्यते”** लोके व्यवहर्तृषु पदार्थबोधकत्वेन प्रसिद्धः श्रोत्रेन्द्रियग्राह्यत्वात् वर्णरूपध्वनिसमूह एव शब्द इत्यर्थः। स्फोटस्य स्रोतांसि “वागेव विश्वा भुवनानि जज्ञे”, “ओमित्येतदक्षरमिदं सर्वम्”, “वाचो ह वाक्” वेदब्राह्मणादिवारिधिषु समुपलभ्यन्ते। “अवङ् स्फोटायनस्य”[2] इति सुत्रे स्फोटशब्दो दृष्टिगोचरीभवति।अमुं स्फोटायनशब्दं हरदत्तः पदमञ्जर्यां विवृणोति- “स्फोटोऽयनं पारायणं यस्य स स्फोटायनः, स्फोटप्रतिपादनपरो वैयाकरणाचार्यः।” निरूक्तकारयास्काचार्योऽपि शब्दस्य नित्यत्वं व्यापकत्वमगुणत्वं च व्यवस्थापितवान्। जगत्कारणस्य सत्यत्वं, ब्रह्मत्वं, आत्मत्वं च उपनिषत्सु विविधाभिः श्रुतिभिः प्रतिपाद्यते तथैव शब्दतत्वाख्यं ब्रह्म एव जगत्कारणमिति “ओमिति ब्रह्म”, “वाच्येव विश्वं बहुरूपं निबद्धं तदेतदेकं प्रविभज्योपभुङ्क्ते” इत्यादिभिः श्रुतिभिः समर्थ्यते। तेन सकलजगत्कारणम् उत्पत्तिविनाशरहितं ब्रह्म शब्दतत्त्वमिति विज्ञायते। तस्य शब्दब्रह्मणः जगद्व्यवहार्यत्वविषये पत्रेऽस्मिन् विचार्यते।

**कूटशब्दाः- शब्दः, ब्रह्म, स्फोटः, जगत्, कारणम्,।**

## भूमिका

जगच्छब्दः गच्छतीत्यर्थे गम्लृ गतौ इत्यस्माद्धातोः “अन्येभ्योऽपि दृश्यते”[3] इति सुत्रेण क्विपि “द्युतिगमिजुहोतीनां द्वे च” इति वर्तिकेन द्वित्वे, “गमः क्वौ[4]“ इत्यनेनानुनासिकलोपे तुगागमे च निष्पद्यते, “वर्तमाने पृषद्बृहन्म्हज्जगच्छतृवच्च”[5] इत्युणादिसूत्रेण निपातनेन वा।गतिशीलमिदं जगत्। सा च गतिरनादिकालत्मिका। अनादिश्च प्राणिमात्रसञ्चरणशीलो लोकव्यवहारः। येन प्राणिनो लोके व्यवहरन्ति, स व्यवहारः परम्परातो लब्धो नाद्यतनः। उक्तञ्च न्यायवाचस्पत्ये “स्वर्गादिभुवां महर्षिदेवतानामीश्वरेण साक्षादेव कृतः सङ्केतः तद्व्यवहाराच्चास्मदादीनामपि सुग्रहस्त-त्सङ्केतः[6]“ स च सङ्केतः शब्दात्मकत्वाच्छब्दमूलकः।

उक्तञ्च वाक्यपदीये -

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमाहते।**

**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते॥**[7]

प्रत्ययश्च स्फोटात्मकेनैव शब्देन भवति।अत एव तस्य प्राधान्यम्।तत्र ध्वन्यात्मकशब्दस्य निरर्थकत्वाद्वर्णात्मकविषय उच्यते- "वर्णाः प्रत्येकमिति चेत्, न, द्वितीयादिवर्णोच्चारणवैयर्थ्यापत्तेः[8]। नापि वर्णसंघातः, उच्चरितप्रध्वंसितत्वेन यौग्यपद्यासम्भवात्। अभिव्यक्तेरुत्पत्तेर्वा क्षणस्थायित्वात् क्षणात्मककालस्य प्रत्यक्षायोग्यत्वेन तदवच्छिन्नवर्णस्यापि अप्रत्यक्षत्वात्।

**वर्णात्मकशब्देन प्रत्ययवादिनैयायिकानां मतम्**

वर्णाः यद्यपि अनित्यास्तथापि उत्तरोत्तरो यः वर्णस्तस्मिन् पूर्वपूर्ववर्णा अव्यवहितोत्तरत्वसम्बन्धेन संस्कारवशात् पूर्वपूर्ववर्णानुभवजनितसंस्कारबलात् गृह्यन्त इत्येवं पदस्य प्रत्यक्षत्वात् शाब्दबोधः।

यद्वा पूर्वपूर्ववर्णेभ्यो जायमानाः शब्दाः शब्दजशब्दन्यायेन वीचितरङ्गवत् एकशब्दाच्छब्दान्तरोत्पत्तिर्जायत इति पूर्वपूर्ववर्णेभ्यो उत्तरोत्तरवर्णा उत्पद्यन्ते। यथा पटशब्दे पकारादकारः उत्पन्नष्टकारमुत्पादयति, स चाकारमेवं यावदन्तिमवर्णश्रवणं तिष्ठतीति तत्तद्वर्णाव्यवहितोत्तरतत्तद्वर्णत्वरूपानुपूर्वीज्ञानस्य नितरां सौलभ्यम्। यद्वा पूर्वपूर्ववर्णानुभवजन्यो यः संस्कारस्तत्सहचरितो यश्चरमवर्णानुभवस्तत एव शाब्दबोधः। यथा पटशब्दे पकारज्ञानजन्यः संस्कारोऽकारज्ञानजन्यसंस्कारे संक्रामति। स च टकारज्ञानजन्ये।

**नैयायिकमतखण्डनम्**

"[9]आद्येऽयंपूर्वोऽयं पर इत्यभिलापासम्भवेनाव्यवहितोत्तरत्वसम्बन्धाभावात्, नष्टविद्यमानयोरव्यवहितोत्तरत्वसम्बन्धस्य वक्तुमशक्यत्वाच्च। द्वितीये शब्दजशब्दन्यायेन पदप्रत्यक्ष्यो-पपादनेऽपि पदस्याविद्यमानत्वेन तत्र शक्त्याश्रयत्वस्य ग्रहानुपपत्तेः। तृतीये येन क्रमेणानुभवः तेनैव क्रमेण तत्संस्कारस्थितिरित्यत्र विनिगमकाभावत् सरो रसो नदी दीन इत्यादौ विपरीतसंस्कारोद्बोधेन प्रत्येकमन्यार्थप्रत्ययापत्तेः"। एतेन वर्णात्मकशब्देन कथमपि बोधाभावात् प्रत्यासत्तिन्यायेन स्फोटात्मक शब्द एव प्रत्ययबोधक इति, शक्त्याश्रयान्यथाऽनुपपत्त्या स्फोटस्यैव कल्पनात्। अर्थात् स्फुटत्यर्थः प्रत्ययो यस्मादिति विग्रहेण यद्वा स्फोट्यते प्रकाश्यतेऽर्थोऽनेनेति विग्रहेण स्फोटशब्दस्य निष्पत्तेः प्रत्ययाधीना हि जगतो व्यवहाराः, स च प्रत्ययः स्फोटात्मकशब्दाभिजन्यः इत्यर्थो भवति।

अन्तः करणावच्छिन्नचिदात्मा स्फोटपदाभिधेयः। स च नित्यानित्यभेदेन द्विविधः, तत्रानित्यध्वनिरूपितोऽनित्यो विशेषपदार्थमादाय तद्रूपितो नित्यः, एवं भिन्नकारणेन भिन्नकार्यमिव भिन्नकारणभूतध्वनिभिरुच्चार्यमाणं कार्यमपि भिन्नं तद्रूपितः स्फोटोऽपि भिन्नः।

सृष्टिक्रमनिरूपणप्रस्तावे जगत्कारणीभूतस्य नैयायिकनये परमाणोरिव वेदान्तिनये ब्रह्मण इव शाब्दिकसिद्धान्ते स्फोटस्य महती चर्चा श्रवणविषयतां भजते। सत्स्वप्यनेकदार्शनिकतत्त्वविचारसमाधानेषु शाब्दिकानां दार्शनिकतत्त्वप्रासादस्तु स्फोटभित्तिमेव विशेषतोऽवलम्बते।

परन्तु स्फोटस्योत्पत्तिः कथम् ? कश्च प्रवर्तकः ? इत्यादयोऽनेके प्रश्ना अद्यापि समाधिमर्हन्ति। यद्यपि शाब्दिकानामपीतिवृत्तस्य पृष्ठानि मौनमेवावलम्बन्ते, तथापि सूक्ष्मेक्षिकया पर्यालोचनेनानुमातुं शक्यते यत् "वागेव विश्वा भुवनानि जज्ञे"[10], "ओमित्येतदक्षरमिदं सर्वम्"[11], "वाचो ह वाक्" इत्यादिभिर्वचनैर्वेदब्राह्मणवारिधिवर्तमानैः स्रोतोभिः स्फोटस्य सम्बन्धं स्थापयन्तो भवेयुः शाब्दिका इति ।

तत्रापि वैचित्र्यमिदं यद्वेदब्राह्मणादिग्रन्थेषु गोवागादिशब्दाः शब्दपर्यायत्वेन प्रयुज्यमानास्तत्र तत्र नितरां निभाल्यन्ते, स्फोटपर्यायत्वेन तु वचनापि नोपलभ्यन्ते । अतो वादत्वेन स्फोटस्य कदा प्रारम्भ इत्ययं प्रश्नोऽद्यापि समाधिं समभिलषति ।

पाणिनीयसम्प्रदाये "अवङ् स्फोटायनस्य"[12] इति सर्वतः प्राक् स्फोटशब्दः समुपलभ्यते शाब्दिकैरिति। हरदत्तश्चामुं स्फोटायनशब्दं विवृणुते "स्फोटोऽयनं पारायणं यस्य स स्फोटायनः, स्फोटप्रतिपादनपरो वैयाकरणाचार्यः"।[13]

स्फोटायन-ऋषेरेव सिद्धान्तः स्फोटवादत्वेन प्रसिद्धिं गत इति नागेशभट्टेन वैयाकरणसिद्धान्तमञ्जूषाया अन्ते स्फोटवादे प्रतिपादितम् -

"वैयाकरणनागेशः स्फोटायनऋषेर्मतम् ।

परिष्कृत्योक्तवांस्तेन प्रीयतां जगदीश्वरः॥[14]

इत्यादिस्थलेषु शब्दतः स्फोटपदार्थो दृष्टिपथमायाति। अर्थतश्च "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्"[15] इत्यत्र स्फोटस्यैवार्थवाचकत्वात्, तथा च महाभाष्ये "येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः"।[16]

प्रदीपे च "वर्णानां प्रत्येकं वाचकत्वे द्वितीयादिवर्णोच्चारणानर्थक्यप्रसङ्गात्, आनर्थक्येषु प्रत्येकमुत्पत्तिपक्षे यौगपद्येनोत्पत्त्यभावात्। अभिव्यक्तिपक्षे तु क्रमेणैवाभिव्यक्त्या समुदायादेकस्मृत्युपारूढानां च वाचकत्वे सरो रस इत्यादावर्थप्रतिपत्त्यविशेषप्रसङ्गव्यतिरिक्तः स्फोटो नादाभिव्यङ्गथोऽर्थवाचकः"[17] इति। अयमर्थः:- जाग्रत्स्वप्न-सुषुप्ति-तुरीयावस्थाभेदेन चतुर्विधं चैतन्यमिव परा-पश्यन्ती-मध्यमा-वैखरीध्वनिभेदेन शब्दतत्त्वमपि चातुर्विध्यं भजते।

परावाङ् मूलचक्रस्था पश्यन्ती नाभिसंस्थिता।

हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा॥

यद्यपि शब्दश्चैतन्यात्मा स्वरूपेणाविक्रियः, तथापि ध्वनिकारणीभुताद् व्यापारात् तत्तत्स्थानेषु कण्ठताल्वादिषु जिह्वोपाग्रादिरूपकरणाभिघातरूपात् सञ्जातेन ध्वनिनाऽभिव्यक्तः। कत्वखत्वादितारत्वमन्द्रत्वादिरूपतद्धर्मोपग्रहेण प्रतिलब्धविक्रियाविशेषः।समुपजात इव लक्ष्यमाणः स्वेन परमार्थरूपेण चैतन्यात्मना

श्रोत्राग्राह्यः। केवलं मनोमात्रग्राह्योऽपि ध्वनिधर्मोपग्रहेण श्रोत्रानुपाती श्रोत्रग्राह्योऽर्थस्य प्रकाशत्वेन च प्रतिसंक्रान्तार्थाकारोपग्रहेण नित्यमवस्थानान्नित्यं स्वार्थपरतन्त्रोऽर्थबोधनाय प्रयुज्यते-

द्वावुपादानशब्देषु शब्दौ शब्दविदो विदुः।

एको निमित्तं शब्दानामपरोऽर्थे प्रयुज्यते॥[18]

तत्र स्फोटव्यञ्जकत्वेऽपि वैमत्यमाचार्येषु। नागेशमते वैखरीनादोत्साहितमध्यमानादेन स्फोटाभिव्यक्तिः। वैखरीनादो भेरीनादवन्निरर्थकः-

वैखर्य्या हि कृतो नादः परश्रवणगोचरः।

मध्यमया कृतो नादः स्फोटव्यञ्जक उच्यते॥[19]

भर्तृहरिणा प्राकृतवैखरीनादेनैव स्फोटस्य व्यञ्जकत्वं स्वीकृतम्-

स्फोटस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते।

शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदं तु वैकृताः ॥[20]

ध्वनिस्तु द्विविधः प्राकृतो वैकृतश्च,प्रकृत्यार्थबोधनेच्छया स्वभावेन वा जातः स्फोटव्यञ्जकः प्रथमः प्राकृतः। तस्मात् प्रकृताज्जातो विकृतिविशिष्टश्चिरस्थायी निवर्तको वैकृतिकः।

तत्र वैखर्य्याः प्राकृतनादः स्फोटव्यञ्जको वैकृतश्च वृत्तिनिवर्तकः। स च स्फोटपदार्थः शब्दतत्त्वं शाब्दिकनयेऽनादिनिधनं ब्रह्मपदाभिधेयम्। तत एव जगतः प्रक्रिया प्रथमो व्यवहारः। तदुक्तम्-

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।

विवर्ततऽर्थभावेन प्रक्रिया जगतो यतः॥[21]

यद् ब्रह्मानादिनिधनमुत्पत्तिविनाशरहितं सर्वविकल्पातीतं तदेव शब्दत्तत्त्वम्। अर्थानां शब्दोपग्राह्यतयाऽर्थेषु मृदादिवत् प्रकृतित्वेन शब्दानुगमात्।तच्चाक्षराणां निमित्तत्वादक्षरमर्थरूपतया स्वरूपादप्रच्युतं प्रतीयते। यतः शब्दतत्त्वाद् ब्रह्मणो सकलागमानां प्रथमत उत्पत्तिरिरिति। एतेनापि जगतः सर्वव्यवहाराः स्फोटाख्यशब्दब्रह्मणः प्रादुर्भूता इति ज्ञायते।

यतो हि ब्रह्मणो दशाद्वयी शास्त्रे प्रसिद्धा- एका विद्ययाऽप्रविभागदशा, अपरा चाविद्यया प्रविभागदशा । तत्र यद्यपि प्रविभागदशायां ब्रह्म विविधविकल्पगोचरम्। तस्यां दशायामेकस्यैव ब्रह्मणो धर्मधर्म्यादिरूपेण विकल्पः। घटोऽभूत्, भवति, भविष्यतीत्यादि कालभेदेन विभिन्नातिपुरस्कारेण च गोघटादिप्रत्ययः। कयोश्चिद्भेदप्रत्ययः, कयोश्चिदभेदप्रत्ययः, क्वचिद्भावप्रत्ययः, क्वचिच्चाभावप्रत्ययः, तथापि कार्यरूपेण प्रविभागाभावदशायां तादृशसर्वविकल्पातीतं ब्रह्मतत्त्वमेकम्।

किञ्च, तस्यां दशायां स्वस्माद् भेदाभेदाभ्यामनिर्वाच्याभिः सर्वकार्यानुकूलाभिः शक्तिभिरध्यासितम्। ताश्च शक्तयो ब्रह्मणि सर्गादिकार्यानुमेया वह्न्यादिशक्तिवत् सन्त्येव, न तु भेदाभेदानामनिर्वाच्यत्वाच्छशविषाणवत् तुच्छभूताः ।

तत्रापि ब्रह्मण्यविद्याशक्तिमूलिकास्ताः शक्तयः कार्यरूपेण ब्रह्मणः प्रविभागसम्पादिकाः, विद्याशक्तिश्च तत्राविभागसम्पादिका। ततश्च ब्रह्मणो विद्याशक्तिमद्रूपं सर्वविकल्पातीतम्, अविद्याशक्तिमच्च सर्वकार्यानुकूलशक्तिभिः समाश्रितं विकल्पगोचरं चेति। यच्च ब्रह्मणो जगद्रूपेणाविवर्तावस्थायां सर्वविकल्पातीतं रूपं तदेवात्रानादिनिधनमिति निर्दिष्टम्। उत्पत्तिविनाशरहितमित्यर्थः। एतच्चोपलक्षणं धर्मधर्म्यादिरूपप्रागुदाहृतसर्वविकल्पशून्यत्वस्यापि।अथवा जगद्रूपेण विवर्तावस्थायामपि ब्रह्मानादिनिधनमेव ।

तथा हि ब्रह्मणः स्वकार्यभूतविषयाकारेणोत्पत्तिनिधनादिभिर्विविधविकल्पैः परिच्छेदः, सोऽविद्याशक्तिवशात् सत्य इव भासते। न तु सत्या एव तथा विकल्पमाना विषयाः, ब्रह्मणः श्रुतेन कूटस्थनित्यत्वेनोत्पत्तिनिधनादिरूपसत्यविकल्पासम्भवात् ।

ननु यदि विवर्तदशायां प्रतीयमाना विषया न सत्याः, तदा कुतस्तत्प्रतीतिरिरिति चेत्, न, अनादौ संसारे यद् अभूत्, भवति, भविष्यतीत्यादिरूपं कालभेददर्शनं तदभ्याससञ्जातसंस्काराणां परिपाकवशात् कालोपाधिकस्तादृशः सर्वोऽपि कालव्यवहारः। किञ्च, मूर्तिमतां गोघटादीनां पृथग्देशग्रहणाभ्याससञ्जातसंस्कारपरिपाकवशेन च देशोपाधिकः सर्वोऽपि व्यवहारः, न तु गवादितत्त्वनिबन्धनः। गवादीनां विषयाणां ब्रह्मणो विवर्तभूतानां ब्रह्मणोऽव्यतिरेके ब्रह्मणो देशकालकृतविभागाभावश्च ब्रह्मविद आहुः - प्रदेशोऽपि ब्रह्मणः सार्वरूप्यमनतिक्रान्तश्च विकल्पश्चेति।

एवञ्च देशकालभेदेन व्यवहारानुपातिनो धर्मधर्म्यादिभावेनोत्पत्तिनिधनादिभिश्च विकल्प्यमाना एव विषयाः, न तु तैर्व्यवह्रियमाणमपि ब्रह्मानादिनिधनेऽन्यान् विकल्पानाश्रयति, कूटस्थत्वेनाविकारित्वाद् विवर्तदशायामपि ब्रह्म तावदनादिनिधनमेव। एकमेव हि ब्रह्म कार्यं च कारणञ्चेति। अतो यथाक्रमं विभक्तं चाविभक्तं च सर्वेषु श्रुतिप्रमितवादेष्ववस्थितम्। तस्य च कार्यं प्रति प्रवृत्तिकोटिनिवृत्तिकोटिर्वा यथाक्रमं पूर्वापरकालकल्पनाशून्या न परिसंख्यातुं शक्यते। नहि ब्रह्मणः सर्गतः प्राक् किञ्चिन्नासीत्, सर्गनिवृत्तेश्च पश्चान्नास्ति किमपीति कल्पयितुमपि शक्यते। अनादित्वात् प्रवृत्तिनिवृत्त्योः कालपरिच्छेदासम्भवात्।

तच्च ब्रह्म शब्दत्तत्त्वं शब्दात्मकमित्यर्थः। ननु प्रागुक्तं ब्रह्म सर्वविकल्पातीततत्त्वमिति। अधुना तु कथं तद्विपरीतमुच्यते शब्दतत्त्वमिति चेत्, न, विकाराणां प्रकृत्यन्वयात् शब्दत्वोपपत्तेः।

तथा हि घटकुण्डलादयो विकारा मृत्सुवर्णादिप्रकृत्यन्विता हि दृश्यन्ते। तथैवैते रूपादयो विषयाः शब्दरूपानुगता एव दृश्यन्ते। तदुक्तम् - "वागेवार्थं पश्यति वाग् ब्रवीति वागेवार्थं निहितं सन्तनोति। वाच्येव विश्वं बहुरूपं निबद्धं तदेतदेकं प्रविभज्योपभुङ्क्ते। सूक्ष्मं वाक्तत्त्वमेव ज्ञातृरूपेणावस्थितं सत् स्वपरिमाणेन स्थूलशब्देन प्रकाशितं स्वपरिणामभूतमर्थं पश्यति,जानातीत्यर्थः"[22]। तदेव वाक्तत्त्वं स्वस्मिन् निहितमविभागेन शक्तिरूपेणावस्थितमर्थं विषयजातं सर्गे प्रबोधवृत्त्या प्रविभज्य विस्ताररूपेण प्रदर्शयति । तस्मिन्नेव वाक्तत्त्वे दैनन्दिने प्रलयेऽन्यस्मिन् वा नाना जातिनिबद्धं विश्वं शक्तिरूपेण तिष्ठति। सर्गकाले च प्रबोधे कार्यरूपेणावतिष्ठते। तदेवमेतदेकमेव वाक्तत्त्वं भोक्तृलोकः स्वादृष्टद्वारा प्रविभज्य नानाभोग्यरूपतां स्वयमेवापाद्योपभुङ्क्ते। नहि तत्रोपभोग ईश्वरस्य कर्मनिरपेक्षस्य हेतुत्वम्, वैषम्यनैर्घृण्यापातात्। कर्मसापेक्षस्य हेतुत्वे तु जीव एव शब्दशक्तिनिबन्धनः। स्वकर्मद्वारा प्रधानं कारणं भोगः। जाग्रदवस्थायां सर्वेषां प्राणिनां सर्वोऽपि व्यवहारो वाग्रूपतानुविद्धचैतन्यपूर्वकः। तस्मिंश्च वाग्रूपतयैव चैतन्यमिति। तथा च जाग्रद्वृत्तौ वाक्

सर्वव्यवहारसाधनम्। स्वप्ने च सर्वव्यवहारसाधनत्वेऽपि सर्वव्यवहार-कर्मत्वमपि वाच एव।

शब्दब्रह्म तावदर्थभेदमाश्रित्य तत्तप्रकृतिमापन्नं घटरूपार्थबोधनाय घटप्रकृतिं पटरूपार्थबोधनाय च पटप्रकृतिमाश्रयते । स च स्फोटात्मा यद्यप्येकोऽखण्डश्च, तथापि पदं वाक्यं जपाकुसुमादिलोहित्यपीतत्वा-दिव्यञ्जकोप रागवशाल्लोहितः पीतः स्फटिक इति भानवद् वर्णाभिव्यङ्ग्यो वर्णरूपः पदरूपो वाक्यरूपश्च। यथा च मुखे मणिकृपाणदर्पणव्यञ्जकोपाधिवशाद् दैर्ध्यवर्तुलत्वादिभानं तद्वत्। अयं त्वोपाधिको भेदः। वस्तुतस्तु तस्याखण्डत्वमेव । तदुक्तम् –

"न वर्णव्यतिरेकेण पदमन्यच्च विद्यते।

वाक्यं वर्णपदाभ्यां च व्यतिरिक्तं न किञ्चन॥

पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च।

वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन॥

यस्या मूलप्रकृतेः पदार्थानामभिभवस्तस्यामेव निलीयन्ते। यथा सांख्यनये मूलप्रकृतिरविकृतिः, ततश्चाहङ्कारोऽभिभूतः। अहङ्काराच्छब्दस्पर्श रूपरसगन्धादितन्मात्राणामुत्पत्तिः। ताभ्यश्च तेजोजलादिमहाभूतानामभिभवः। लये तु महाभूतानां स्वस्व-तन्मात्रासु विलयः, तासाञ्चाहङ्कारे, अहङ्कारस्य च मूलप्रकृतौ। तथैव शाब्दिकनयेऽपि परावाग् विकृतिरहिता ततश्च पश्यन्त्यादिवाचां घटाद्यर्थरूपविवक्षयाऽभिभूतिः। तदुक्तम्-

लब्धक्रियः प्रयत्नेन वक्तुरिच्छानुवर्तिना।

स्थानेष्वभिहतो वायुः शब्दत्वं प्रतिपद्यते॥[23]

वक्तुरिच्छानुवर्तिना विवक्षाजन्येन प्रयत्नेन लब्धक्रियः प्रेरितो वायुरेकघन स्थानेषूरः कण्ठताल्वादिष्वभिहतोऽभिधाताख्यसंयोग-स्वभावाच्छब्दत्वं ऊर्ध्वमाक्रामन् प्रतिपद्यते शब्दाकारतया परिणमते। यथा मेघस्थमुदकं प्रतिकूलवातसहकृतेन तादृशे नोदकान्तरेणाभिहतं विद्युद्रूपतया परिणमते ।

पाणिनीयश्शब्दनिष्पतिप्रकारः-

आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया।

मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्।

मारुतस्तूरसि चरन् मन्दं जनयते स्वरम्॥[24]

एवं क्रमेणैवार्थरूपाकारतया शब्दनिष्पत्तिः। सा परा वागेव तत्तदर्थबोधेच्छया काल्पनिकं परिणमते,न तु वास्तविकः परिणामः, शब्दार्थयोस्तत्सम्बन्धस्य च नित्यत्वात् तयोस्तादात्म्याच्च । उक्तञ्च महाभाष्ये-" सिद्धे शब्दार्थसम्बन्धे"[25] इति ।

अत्र सिद्धशब्दो नित्यपर्यायवाची। शब्दो नित्यः, अर्थो नित्यस्त-योश्च सम्बन्धोऽपि नित्य इति। अतो नित्यशब्दार्थसम्बन्धानां परिणामो न वास्तविकः।

योऽयं व्यवहारयोग्यपरिच्छेदरूपे चैतन्ये वाग्रूपतानुगमस्तत एव लोकस्य पदार्थानां विशिष्टाकारपरिच्छेदक इदं तदिति वाग्रूपतानुषक्तः प्रत्यवमर्शात्मा व्यवहारः, सर्वास्वर्थक्रियासु प्रवृत्तयश्च, वाग्रूपतानुगतं चैतन्यमेव च संज्ञापदेन व्यपदिश्यते।

लोके यन्मूलकप्रवृत्तिसत्त्वे "ससंज्ञोऽयमिति व्यपदेशः, सुषुप्तिमद-मूर्च्छामरणादिषु यदभावे विसंज्ञ इति व्यवहारः क्रियते । अत एवैवमाह –

अर्थक्रियासु वाक् सर्वान् समीहयति देहिनः।

तदुत्क्रान्तौ विसंज्ञोऽयं दृश्यते काष्ठकुड्यवत् ॥[26]

तस्मिन्नेव चैतन्ये बिन्दुरूपिण्यां परावाचि तत्तत्कारणमाध्यमेन शब्दार्थयोस्तत्सम्बन्धस्य लयः, तत्र भेदराहित्यात्।

अतः शब्दमूलको हि जगतो व्यवहारो लोके शब्दस्यैव प्राधान्यात्। यथेन्द्रियप्रमाणं जनकातिरिक्तसम्बन्धेनैव बोधं जनयति, तथैव शब्दोऽपि स्वप्रयोज्यविषयत्वसम्बन्धेन बोधं जनयति। अर्थैः शब्दानां यः सम्बन्धः,सैव योग्यता प्राचां मते।नव्यमते तु वाच्यवाचकभावरूपः सम्बन्धान्तरमेव योग्यतेति। शाब्दजनकपदार्थोपस्थित्यनुकूलज्ञान-विषयीभूतपदपदार्थसम्बन्धो वृत्तिः प्राचीनमते। नवीनास्तु शाब्दजन-कोद्बुद्धसंस्कारपदपदार्थसम्बन्धे वृत्तिरिति स्वीकुर्वन्ति। अतोऽर्थ-बोधेच्छया सम्बन्धरूपा वृत्तिरपि तत एव कल्पत इति।

**सहायकग्रन्थसूची-**


व्याकरणमहाभाष्यम्-महर्षिपतञ्जलिः, चौखम्बा संस्कृत प्रतिष्ठान, २०२१

वैयाकरणसिद्धान्तकौमुदी-चौखम्भा सुरभारती प्रकाशन, वाराणसी, २०१७

वाक्यपदीयम्- भर्तृहरि, चौखम्भा ओरियन्टालिया, दिल्ली, २०२१

पाणिनीयशिक्षा- चौखम्भा सुरभारती प्रकाशन, वाराणसी, २०१४

परमलघुमञ्जूषा- नागेशभट्ट, बडौदा संस्कृत महाविद्यालय,१९६१


**संदर्भ:**

[1]म.भा. पस्पशाह्निके

[2]पा. सू.-६।१।१२३

[3]पा.सू.-३/२/१७८

[4]पा.सू.-६/४/४०

[5]उणा.-२/८४

[6]परमलघुमञ्जुषायां शक्तिनिरूपणे।

[7]वा.प.-१/१३३

[8]परमलघुमञ्जुषायां स्फोटनिरूपणे, पृ० ५६ ।

[9]प.ल.म. स्फोटनिरूपणे

[10] वाक्यपदीये, स्वोपज्ञवृत्तिटीका १।१२०

[11] माण्डूकोपनिषद्, म० १।

[12] पाणिनिसूत्रम्-६।१।१२३ ;

[13] काशिकावृत्तिः, पा० सू० ६।१।१२३

[14] वैयाकरणसिद्धान्तमञ्जूषायाम्, ५० ३०३, श्लो० २।

[15] पाणिनिसूत्रम् - १।२।४५;

[16] महाभाष्ये, पस्पशाह्निके ।

[17] म० भा०, प्रदीपे, पस्पशाह्निके

[18] वाक्यपदीये- १/४४।

[19] परमलघुमञ्जूषास्था कारिका, स्फोटनिरूपणे, पु० ६०।

[20] वाक्यपदीय ७७

[21] वाक्यपदीये- १/१।

[22] वाक्यपदीये- १।१२७ ।

[23] वाक्यपदीये-१/१०८

[24] पाणिनिशिक्षायाम्

[25] महाभाष्ये, पस्पशाह्निके, पृ० ४७।

[26] वाक्यपदीये, सोपज्ञवृत्तौ - १।१२६ ।